International Journal of Sanskrit Research 2023; 9(1): 88-93

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(1): 88-93
© 2023 IJSR
www.anantaajournal.com
Received: 21-10-2022
Accepted: 25-11-2022

**Arup Das**
PG, Assistant Professor, Department of Sanskrit, Acharya Brojendra Nath Seal College, Coochbehar, West Bengal, India

**Corresponding Author:**
**Arup Das**
PG, Assistant Professor, Department of Sanskrit, Acharya Brojendra Nath Seal College, Coochbehar, West Bengal, India

# वैदिकव्याकरणे सन्धिसंहितास्वरूपविश्लेषणम्

**Arup Das**

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i1b.1971

**सारसंक्षेपः**

अखिलसंस्कृतवाङ्मयस्य द्विविधं रूपम् – वैदिकं लौकिकञ्च। लौकिकसंस्कृतस्य व्याकरणत्वेन यथा अष्टाध्यायी प्रसिद्धा तद्वत्वैदिकसंस्कृतस्य व्याकरणत्वेन प्रातिशाख्यानां महत्त्वं दरीदृश्यते। तेषां प्रातिशाख्यग्रन्थानां मुख्योद्देशः पदपाठतः संहिता-पाठस्य निर्माणम्। वस्तुतस्तु सन्धयः संहितायां भवन्ति। सन्धिः शब्दस्यार्थः संयोगः, व्यैयाकरणनये वर्णद्वयस्य मेलनं सन्धानं वेति। वैदिकसंस्कृते पदान्ताद्योर्वर्णयोः सुसन्निकर्षाद् विकृते उतो वा अविकृते सन्धिर्विधीयते। वैदिकव्याकरणे सन्धेः पर्यायरूपेण संहिता (स्त्रीलिङ्गवाचका), सन्धिः (पुंलिङ्गवाचकः), सन्धानमिति (नपुंसकलिङ्गवाचकम्) पदत्रितयमेव समुपलभ्यते। सन्धिनियमानि समाश्रित्य पदपाठात् संहिता-पाठस्य निर्माणं भवति। अथ 'संहिता पदप्रकृतिः' इति ऋक्प्रातिशाख्ये सूत्रितम्। पदानां प्रकृतित्वं तत्र निर्धारितम्। संहितापाठपदपाठयोर्मध्ये कस्य प्रकृतित्वं कस्य वा विकृतित्वं स्यादित्यस्मिन् विषये आचार्येषु मतविभिन्नता विद्यते। संहिताया भेदविषयेऽपि विप्रतिपत्तिर्विद्यते प्रातिशाख्यानाम्। आर्षी क्रमश्चेति भेदेन संहिताया द्वैविध्यं भाषितम् ऋक्प्रातिशाखीयभाष्ये। तैत्तिरीयप्रातिशाख्ये संहितायाश्चत्वारः प्रकारा विहिताः। तत्र च पदसंहिताक्षरसंहिता-वर्णसंहिता-अङ्गसंहिताभेदेन संहितायाश्चातुर्विध्यं दर्शितम्। भाष्यकार उवटाचार्यः तदीये ऋक्प्रातिशाख्यस्य तथा वाजसनेयिप्रातिशाख्यस्य भाष्ये सन्धेश्चातुर्विध्यमुल्लिखितवान्। ते च यथा - स्वरसन्धिः, व्यञ्जनसन्धिः, स्वर-व्यञ्जनसन्धिः, व्यञ्जन-स्वरसन्धिश्च।

**सूचक शब्दाः** सन्धिः, संहिता, प्रकृतिः

**प्रस्तावना:**

अखिलसंस्कृतवाङ्मयस्य द्विविधं रूपम् – वैदिकं लौकिकञ्च। अनयोः रूपयोः यथावदनुवर्त्तनस्य कारणमत्र तयोः व्याकरणम्। शब्दानां साध्वसाधुत्वनिर्णयपूर्वकं भाषायाः संस्कृतं स्वरूपं निरूपयति शास्त्रमिदम्। लौकिकसंस्कृतस्य व्याकरणत्वेन यथा अष्टाध्यायी प्रसिद्धा तद्वत्वैदिकसंस्कृतस्य व्याकरणत्वेन प्रातिशाख्यानां महत्त्वं दरीदृश्यते। अथ वेदप्रतिपाद्यं यत्तदेव वैदिकम्। तस्मिन्वैदिक-साहित्ये शाखाविशेषं समाश्रित्य तद्गतसन्धिस्वरादीनां निर्देशाय प्रवृत्तं शास्त्रमेव प्रातिशाख्यमिति नाम्ना व्यपदिश्यते। वेदस्य स्वरूपज्ञाने उपकारकतया षण्णां वेदाङ्गानां प्रसिद्धिरस्ति। शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषञ्चेत्येतेषु षट्सु वेदाङ्गेषु शिक्षा-च्छन्दो- -व्याकरणानामालोचनं प्रातिशाख्ये लक्ष्यते।[1] तेषां प्रातिशाख्यग्रन्थानां मुख्योद्देशः पदपाठतः संहिता-पाठस्य

उल्लेखपञ्जिः[1] जगदीशचन्द्रमिश्रः. वैदिकवाङ्मयस्येतिहासः. पृष्ठाङ्कः – ३०५.

निर्माणम्। पदपाठतः संहितापाठस्य निर्माणाय सन्धेर्नियमोऽपरिहार्यः इति ज्ञेयः। वस्तुतस्तु सन्धयः संहितायां भवन्ति। यतो हि संहितायामेव सन्धेर्नियमाः प्रक्रमन्ते। सन्धिशब्दस्यास्यार्थः संयोगः, व्यैयाकरणनये वर्णद्वयस्य मेलनं सन्धानं वेति।[2] ऋग्वेदसंहितायामपि संयोग इत्यर्थे सन्धिशब्दस्यास्य प्रयोगो लक्ष्यते। तथा हि ऋग्वेदे आम्नायते –

'......सन्धाता सन्धिं मघवा पुरूवसुरिस्कर्त्ता विहुतं पुनः।।' इति। (ऋग्वेदसंहिता ८।१।१२)

ननु को नाम संयोगः? प्रसङ्गेऽस्मिन् महर्षिकात्यायनेन प्रोक्तम् – 'अनन्तरं संयोगः' (वाजसनेयिप्रातिशाख्यम् १।४८) इति। अर्थाद् व्यञ्जने व्यञ्जनानि वा यत्र स्वरेण व्यवहितानि तत्रैव तावत्संयोगसंज्ञकानि स्युः इत्याशयः। तथा च समर्थितं पाणिनिना अष्टाध्याय्याम् – *'हलोऽनन्तराः संयोगः'* इति (अष्टाध्यायी १।१।७)। अत एव अव्यवहितयोः पदान्तपदाद्योर्वर्णयोः सन्निकर्षात्तत्र निरतिशयमानन्तर्य्यमेव इह प्रतिपन्नम्। अथ कुत्रोपपद्यते संयोगोऽयमिति पृष्टे अत्रोद्धृता श्रीजीवपादस्य हरिनामामृतव्याकरणादेका प्राचीनकारिका –

"सन्धिरेकपदे नित्यं नित्यं धातूपसर्गयोः।
अनित्यं सूत्रनिर्द्देशेऽन्यत्र चानित्यमिष्यते।।"[3] इति।

लौकिकसंस्कृते सन्निहितयोः पदान्त-पदाद्योर्वर्णयोः विकारे केवलं सन्धेर्नियमो विधीयते। यथा –

तद् + शरीरम् > तज् + शरीरम् > तच् + शरीरम् > तच्छरीरम् इति। अस्मिनुदाहरणे "स्तोः श्चुना श्चुः" इति पाणिनीयसूत्रेण पदान्तदकारस्य जकारादेशे तस्य जकारस्य "खरि च" इत्यनेन चकारे कृते "छत्वममीति वाच्यम्" इति वार्तिकेन शस्य छत्वे च कृते तच्छरीरमिति पदं सिद्धम्। परन्तु वैदिकसंस्कृते पदान्तपदाद्योर्वर्णयोः सुसन्निकर्षाद्विकृते उतो वा अविकृते सन्धिर्विधीयते। तथाहि आ । एनम् । देवासः (प.पा.) = *'ऐनं देवासः'* (सं.पा.) (ऋग्वेदसंहिता १।१२३।१) इत्यत्र "परेष्वैकारमोजयोः" (ऋग्वेदप्रातिशाख्य २।१८) इति प्रातिशाखीयसूत्रेण वैकृते सन्धिः निष्पन्नो स्यात्। पुनः भाष्यकारेणोवटाचार्येण स्वकीये ऋक्प्रातिशाख्यभाष्ये समुद्धृते *'न नि मिषति सुरणः'* (ऋग्वेदसंहिता ३।२९।१४) इत्युदाहरणे पूर्वोत्तरयोर्वर्णयोः विकाराभावे सत्यनुलोम-अन्वक्षर-सन्धेर्नियं[4] दर्शितः।

वैदिकव्याकरणे सन्धेः पर्यायरूपेण संहिता (स्त्रीलिङ्गवाचका), सन्धिः (पुंलिङ्गवाचकः), सन्धानम् इति (नपुंसकलिङ्गवाचकम्) पदत्रितयमेव समुपलभ्यते।[5] वस्तुतः सम्-पूर्वकं 'डुधाञ् धारणपोषणयोः' इति जुहोत्यादिगणीयधा-धातोरनन्तरं क्त-टाप्-कि-ल्युटिति विविधप्रत्ययैः निष्पन्नमिदं पदत्रयम्। पाणिनि-शौनक-कात्यायनादिभिः आचार्यैः संहितालक्षणनिर्धारणे महान्प्रयत्नः कृतः। एभिराचार्यैः प्रतिपादितानि संहितालक्षणानि यथा "परः सन्निकर्षः संहिता"[6], "संहिता पदप्रकृतिः"[7], "पूर्वेणोत्तरः संहिताः"[8], "वर्णानामेकप्राणयोगः संहिताः"[9], "सन्निकर्षः संहिता"[10] इत्यादीनि स्व स्व ग्रन्थेषु व्यवस्थापितानि। एतेषां सर्वेषां सङ्कलितलक्षणानामाभिप्रायानुसारं संहिताशब्दः स्वरैः स्वरयुक्तव्यञ्जनैर्वा कल्पितानां पदानां पदान्तपदाद्योर्वर्णयोः सन्धिजन्यार्धमात्राधिककालव्यवधानाभावपरः सन्निकर्षार्थे पर्यवतिष्ठते। अर्धमात्राकालेन पदान्तपदाद्योः वर्णयोः व्यवधानं प्रातिशाख्यव्यतिरिक्ते शास्त्रान्तरे संहिता उच्यते[11] 'पदान्तान्पदादिभिः संदधदेति यत्सा कालाव्यवायेन' (ऋग्वेदप्रातिशाख्यम् २।२) इति सूत्रेण तु शौनकाचार्य्यः पदान्तपदाद्योः वर्णयोर्मध्ये व्यवधानं न अङ्गीकृतवान्। ऐतरेयारण्यके संहितायाः स्वरूपविषये आम्नायते यत् –

---

[2] 'एकार्थयोः सन्धानसंयोगशब्दयोः' इति। - तैत्तिरीयप्रातिशाख्यम्(त्रिभाष्यरत्नभाष्यम्). सम्पा. आर् शामशास्त्रि-के.रङ्गाचार्यौ. पृष्ठाङ्कः- ५२३

[3] श्रीहरिनामामृतव्याकरणम्, सन्धि-प्रकरणम्।

[4] स्वराश्च पूर्वे भवन्ति व्यञ्जनमुत्तरं यदेभ्यः तेऽन्वक्षरसन्धयोऽनुलोमाः इति। - ऋग्वेदप्रातिशाख्यम् २।८।

[5] प्रसङ्गेऽस्मिनुल्लिख्यते - 'पूर्वोत्तरवर्णानामविरामेणोच्चारणं सन्धानं सन्धिः संहितेति यावत्' इति। - शाकटायन-प्रक्रिया-संग्रहस्थं भाष्यम्।

[6] अष्टाध्यायी १।४।१०९.
वर्णानाम् अतिशयितः सन्निधिः संहितासंज्ञा स्यात्। वालमनोरमायां निरूपितम् – "परः अतिशयितः ..... सन्निकर्षः सामीप्यम् – अर्धमात्राधिककालव्यवधानाभावः, अर्धमात्राकालव्यवधानस्य अवर्जनीयत्वात्।" इति। - वैयाकरणसिद्धान्तकौमुदी (संज्ञाप्रकरणम्). सम्पा. गिरिधरशर्मा-परमेश्वरानन्दशर्मनौ. पृष्ठाङ्कः – ३९.

[7] ऋग्वेदप्रातिशाख्यम् २।१

[8] वाजसनेयिप्रातिशाख्यम् १।१५५
"पूर्वेण पदान्तेन उत्तरः पदादिः संहिता यदा क्रियते स्वरतो वर्णतश्च तदा द्विपदसंहितोच्यते।" इति। - वाजसनेयिप्रातिशाख्यम् (उवटभाष्यम्). सम्पा. वि. वेङ्कटरामशर्मा. पृष्ठाङ्कः –६२.

[9] वाजसनेयिप्रातिशाख्यम् १।१५८

[10] ऋक्तन्त्रम्. ६७

[11] 'परो यः सन्निकर्षो वर्णानामर्धमात्राकालव्यवधानं स संहितासंज्ञो भवति' इति। - अष्टा. १।४।१०९ (काशिकावृत्तिः)

"....पूर्वमेवाक्षरं पूर्वरूपमुत्तरमुत्तररूपं योऽवकाशः पूर्वरूपोत्तररूपे अन्तरेण येन सन्धिः विवर्तयति येन स्वरास्वरं विजानाति येन मात्रामात्रां विभजते सा संहिता" इति। (ऐतरेयआरण्यकम् ३।१।५)।

सन्धिनियमानि समाश्रित्य पदपाठात्संहिता-पाठस्य निर्माणं भवति। 'संहिता पदप्रकृतिः' (ऋग्वेदप्रातिशाख्यम् २।१) इति ऋक्प्रातिशाख्ये सूत्रितम्। सूत्रस्यास्य व्याख्याप्रसङ्गे उवटाचार्येण स्पष्टमुच्यते –

"पदानि प्रकृतिभूतानि यस्याः संहितायाः सा पदप्रकृतिः संहितात्र विकारः" [12] इति।

अर्थात्पदानां प्रकृतित्वं अत्र निर्धारितं भवति। षत्व-णत्वादयस्तु तद्विकारत्वेन स्वीकृताः। प्रकृतिभूतत्वाच्च पदानां सिद्धेः संहिताया विकृतित्वमेव समुदिष्टं षत्व-णत्वादिरूपेण। संहितापदयोर्मध्ये कस्य प्रकृतित्वं कस्य वा विकृतित्वं स्यादित्यस्मिन् विषये आचार्येषु मतविभिन्नता विद्यते। अवसरेऽस्मिन् यास्ककृतनिरुक्तग्रन्थोऽनुसरणीयास्माभिः।

तत्रोक्तं "पदप्रकृतिः संहिता। पदप्रकृतीनि सर्वचरणानां पार्षदानि" (निरुक्तम् १।१७) इति।

समुद्धृतस्यास्य वचनस्य द्विविधं विवेचनमुपलभ्यते दुर्गाचार्यस्य भाष्ये।
तथाच –
"पदानां या प्रकृतिः सेयं पदप्रकृतिः। किं कारणम्? संहितातो हि पदानि प्रक्रियन्ते। तस्मात्संहितैव प्रकृतिर्विकारः पदानीत्येवमेके मन्यन्ते। अपरे पुनः पदप्रकृतिः संहितेति पदानि प्रकृतिर्यस्याः सेयं पदप्रकृतिरिति। किं कारणम् ? पदान्येव हि संहन्यमानानि संहिता भवति। तस्मात्पदान्येव हि प्रकृतिर्विकारः संहितेति।" [13]

अर्थात्, इह पदप्रकृतिपदे आदौ 'पदानां प्रकृतिः' इति षष्ठी-तत्पुरुषसमासात् संहितायाः प्रकृतित्वं पदस्य च विकारत्वम् इत्येके मन्यन्ते। अन्ये च 'पदान्येव प्रकृतिभूतानि यस्याः सा' इति विग्रहेण बहुव्रीहिसमासत्वात् पदस्य प्रकृतित्वं संहितायाश्च विकारत्वं स्वीकुर्वन्ति। परन्तु वाक्यपदीयादिषु प्रौढालोचनसमृद्धग्रन्थेषु संहितायाः प्रकृतित्वं पदानाञ्च विकृतित्वं पर्यालोचितम्। [14] किञ्च तैत्तिरीयप्रातिशाख्ये परिलक्ष्यते संहितापाठपदपाठयोर्मध्ये कस्य प्रकृतित्वं स्यात्तद्विषये वैपरीत्यं वर्तते। तथा च तृतीये अध्याये संहितपाठः प्रकृतिः इति अङ्गीकृत्य पदपाठे ह्रस्वत्वं विधीयते। परन्तु पञ्चमे अध्याये पदपाठस्य प्रकृतित्वं स्वीकृत्य संहितापाठे विविधा विकारा निरूपिताः। प्रसङ्गेऽस्मिन् संहितायाः प्रकृतित्वमङ्गीकृत्य वैदिकाभरणकारेणोक्तं यत् –

'.....मन्दमतीनां तु कश्चिद्भ्रमः प्रादुष्याद्विभक्तपदात्मको वेद इति। तन्निवारणार्थं त्विहाविभक्तरूपं प्रकृतिमाश्रित्य विभागे ह्रस्वत्वं विधीयते। तेन संहिताम्नाय एव वेद इति ख्यापनात्स भ्रमो निवर्तते। नन्वेवमुभयस्य प्रकृतित्वाश्रयणात्कतररूपो वेद इति संशय एव स्यात्। मैवम अस्ति ह्यत्र प्रसिद्धं प्रमाणान्तरम्। ....न तु प्रकृतित्वाश्रयणमेव वेदत्वे प्रमाणमिति ब्रूमः विभक्तरूपस्य तु प्रकृतित्वं व्युत्पादनसौकर्यार्थमाश्रियते' [15] इति।

महाभाष्यकृता महामुनिना पतञ्जलिना तदीये महाभाष्ये 'पदकाराः' [16] इति पदं स्वीकृत्य परोक्षे वैयाकरणानां पदकर्तृत्वमङ्गीकुर्व्वता पदस्य विकारत्वमेव स्वीकृतम्। तर्हि कतरो गरीयानिति विचारे संहितायाः प्रकृतित्वमित्येवपक्षः गरीयानिति निरूप्य मन्त्रदर्शिभिर्ऋषिभिः कृततपसोऽभिव्यज्यमानस्य मन्त्रस्य संहितारूपत्वात्, तथैव ऋषिभिः स्वशिष्येभ्य उपदिष्टत्वाच्च संहितात एव वेदारम्भात् संहितायाः प्रकृतित्वं प्रसिद्धम् । एवञ्च कर्मकाण्डादौ पदानामप्रयोगे संहितामन्त्राणामेव व्यवहारात् संहितायाः प्रकृतित्वमेव सिद्ध्यति। तर्हि

*'पदप्रकृतीनि सर्वचरणानां पार्षदानि'* (निरुक्तम् १।१७) इति

कथनस्य का गतिरिति संशयो जायते मनसि। तन्निरसनायोच्यते यत् पदं येषु प्रातिशाख्यग्रन्थेषु संहितायाः प्रकृतित्वेन विचिन्त्यते पदप्रकृतीनि तानि सर्वचरणानां पार्षदानि व्याख्यायमानेषु तेष्वेवग्रन्थेषु पदानां प्रकृतित्वं भवति, न तु सर्वत्र इत्यवधेयः। अयमाशयः - सर्वत्र प्रातिशाख्यशास्त्रेषु पदानां प्रकृतित्वमङ्गीकृत्य व्याख्यायते।

[12] ऋग्वेदप्रातिशाख्यम् (उवटभाष्यम्). सम्पा. वीरेन्द्रकुमारवर्मा. पृष्ठाङ्कः – १२७

[13] निरुक्तम् १।१७ (दुर्गाभाष्यम्)

[14] 'पदानां संहिता योनिः संहिता वा पदाश्रया।' इति। - वाक्यपदीयम् २।५८

[15] तैत्तिरीयप्रातिशाख्यम् (वैदिकाभरणभाष्यम्). सम्पा. आर् शामशास्त्रि- के.रङ्गाचार्यौ. पृष्ठाङ्कः - ९७

[16] 'न लक्षणेन पदकारा अनुवर्त्याः' इति। - अष्टाध्यायी ३।१।१०९, महाभाष्यम्

प्रातिशाख्ये मुख्यतः ते नियमाः विधीयन्ते, यैः पदेभ्यः संहिता सम्पन्ना भवति। यतो हि स्वरसंस्कारयोर्विधायकोऽयं[17] प्रातिशाख्यग्रन्थः। अत्र तावत् पदयोः पदानां वा समुच्चयेन संहिता स्वरो विचिन्त्यते। तस्मात् कारणात् संहिताया एव प्रकृतित्वं निरूपितम्। संहिताया भेदविषये विप्रतिपत्तिर्विद्यते प्रातिशाख्यानाम्। विषयेऽस्मिन् मौनमवलम्बते ऋक्प्रातिशाख्यकृच्छौनकाचार्यः। परन्तु प्रातिशाख्यस्यास्य २।२ इति संख्यके सूत्रे उवटाचार्येण स्वभाष्ये आर्षी क्रमश्चेति भेदेन संहिताया द्वैविध्यं भाषितम्। तत्र च ऋषिणा दृष्टा संहिता वस्तुतः 'आर्षी संहिता' इति ज्ञेया। उवटमहाभागेन आर्षीसंहितायाः कृते *'अयं देवाय जन्मने'*[18] इत्युदाहरणं समुद्धृतं भाष्ये। तथैव क्रमसंहिता नाम पदाभ्यामारभ्य द्वयोरभिक्रान्तयोः उत्तरं पदं पुनर्गृहीत्वा ताभ्यामुत्तरेण पदेन संश्लेषादर्धर्चं निष्पन्नमिति। यथा – *'अग्निमीळे पुरोहितम्'* (सं.पा.)> अग्निम् । ईळे । पुरःऽहितम् । (प.पा.) > अग्निमीळे । ईळे पुरोहितम् । (क्र.पा.) (ऋग्वेदसंहिता १।१।१) इति। संहिताया विभाजनं निर्दिशता विष्णुमित्रेणापि तदीये वर्गद्वयवृत्तौ उक्तं यत् –

'द्विविधा हि संहिता – अक्षरसंहिता च पदसंहिता च' [19] इति।

किञ्च, तैत्तिरीयप्रातिशाख्ये संहितायाश्चत्वारः प्रकारा विहिताः। तत्र च पदसंहिताक्षरसंहिता-वर्णसंहिता-अङ्गसंहिताभेदेन संहितायाश्चातुर्विध्यं दर्शितम्, येषां क्रमेणैव विवेचनं निम्नधा कृतम्।

**पदसंहिता -** नैकेषां पदानामतिशयमानन्तर्यमेव पदसंहिता इत्युच्यते।[20] यथा – 'अग्ने दुध्र गह्य किंशिल वन्य या ते' (तैत्तिरीयसंहिता ५।५।९) इति। तथा च व्याकरोति पदसंहितां गोपालयज्वा स्वकीयेभाष्ये –

"नानापदयोर्निमित्तभूतयोः निमित्तनिमित्तिनोरुभयरूपयोर्वा सन्धानाद् यत्संयुक्तरूपं भवति, सा पदसंहितेत्युच्यते" इति।

अर्थात् कारणभूतयोः कार्यकारणभूतयोर्वा उभयरूपयोर्विद्यमानत्वादनेकपदानां सन्धेः यत्संयुक्तरूपमुपपद्यते, सा पदसंहिता नाम्ना व्यपदिश्यते। तथा हि 'मिथुश्चरन्तम्' (तै.सं.४।७।१५) इत्युदाहरणे शकारस्यागमार्थं निमित्तभूतयोः मिथुः चरन्तञ्चेति द्वौ पदौ युज्येते। अत एव अत्र पदसंहिता भवति।

**अक्षरसंहिता**

स्वं स्वं स्वरूपमनुसारमक्षरसंहितादिर्निष्पत्तिर्भवति।[21] तथा च त्रिभाष्यरत्ने भाष्यकारेण भणितं यद् 'नानाक्षरसंयोगोऽक्षरसंहिता। ...... केवलस्वरयोः संयोगोऽक्षरसंहिता'[22] इति। उदाहरणं यथा – 'अथाब्रवीत्' (तै.सं. ३।२।११) इत्यत्र 'दीर्घं समानाक्षरे सवर्णपरे' (तैत्तिरीयप्रातिशाख्यम् १०।२) इति नियमेन द्वयोः स्वरयोः (अ + अ) संयोगात् संहितारूपं सिद्ध्यति। वैदिकाभरणकृता उच्यते यत् 'उदात्तात्परोऽनुदात्तः स्वरितम्' इत्यक्षरसंहिता । स इ॒ध्<u>ा</u>नः' इति। अर्थाद् उदात्तादिस्वरविधौ अक्षरासाधारणधर्मसम्बन्धित्वात्तथा तद्विशिष्टाक्षरनिमित्तविषयत्वाच्च अक्षरसंहिता प्रतिपद्यते।

**वर्णसंहिता -** पदसंहितावद् वर्णानां संयोगादेव वर्णसंहिता निष्पद्यते। प्रोक्तं तावत् त्रिभाष्यरत्नाख्यव्याख्याकारेण – 'नानावर्णसंयोगो वर्णसंहिता। .....एकपदे स्वरव्यञ्जनसंयोगो वर्णसंहिता' [23] इति। यथा – 'त्रिभिर्ऋणवा जायते' (तैत्तिरीयसंहिता ६।३।१०) इति। वैदिकाभरणकारस्य मते *'ऋकारर्कारिरषपूर्वो नकारो णकारं समानपदे', 'व्यवेतोऽपि'* (तैत्तिरीयप्रातिशाख्यम् १३।६-७) इत्यादिनियमाभ्यां एकस्मिन्नेव पदे ऋकारादिनिमित्तभूतवर्णपूर्वस्य नकारस्य वर्णान्तरव्यवहितेऽपि णत्वात् सन्धौ प्रतिपादिता

[17] 'स्वरसंस्कारयोश्छन्दसि नियमः' इति। – वाजसनेयिप्रातिशाख्यम् १।१
"स्वर उदात्तानुदात्तस्वरितप्रचितलक्षणः, संस्कारो लोपागमवर्णविकारप्रकृतिभावलक्षणः, तयोः स्वरसंस्कारयोः छन्दसिविषये नियमोऽधिकृतो वेदितव्यः। प्रतिज्ञासूत्रमेतत्। प्रतिज्ञा च शिष्यबुद्धिसमाधानार्था।।" इति। - वाजसनेयिप्रातिशाख्यम् (उवटभाष्यम्). सम्पा. वि. वेङ्कटरामशर्मा. पृष्ठाङ्कः -१.

[18] ऋग्वेदसंहिता १।२०।१
ऋग्वेद-प्रातिशाख्यम् (उवटभाष्यम्). सम्पा. वीरेन्द्रकुमारवर्मा. पृष्ठाङ्कः – १२८.

[19] ऋग्वेदप्रातिशाख्यम् (वर्गद्वयवृत्तिः). सम्पा. वीरेन्द्रकुमारवर्मा. पृष्ठाङ्कः – १८.

[20] 'नानापदसंधानसंयोगः पदसंहितेत्यभिधीयते' इति। - तैत्तिरीयप्रातिशाख्यम् २४।३

[21] 'यथास्वमक्षरसंहितादीनामप्येवम्' इति। – तैत्तिरीयप्रातिशाख्यम् २४।४

[22] तैत्तिरीयप्रातिशाख्यम् (त्रिभाष्यरत्नव्याख्या). सम्पा. आर् शामशास्त्रि-के.रङ्गाचार्यौ. पृष्ठाङ्कः - ५२४

[23] तैत्तिरीयप्रातिशाख्यम् (त्रिभाष्यरत्नव्याख्या). सम्पा. आर् शामशास्त्रि-के.रङ्गाचार्यौ. पृष्ठाङ्कः - ५२४

वर्णसंहिता।[24] यथा - 'अधिषवणमसि', 'पितृणांसदनमसि' (तैत्तिरीयसंहिता १।१।५, १।३।१) इत्यादिः।

**अङ्गसंहिता -** अङ्गभूतानां वर्णानां संश्लेषेण यदि सन्धिर्निष्पद्यते, तदा सा संहिता अङ्गसंहितानाम्ना व्यपदिश्यते। यथा च भाष्यते त्रिभाष्यरत्ने – 'एकपदे केवलव्यञ्जनसंयोगोऽङ्गसंहिता' इति। अथार्द् यदा एकस्मिन् पदे केवलानां व्यञ्जनानां मध्ये संश्लेषो भवेत्तदा तावदङ्गसंहिता स्यात्। तथा हि 'अक्षणया व्याघारयति' (तैत्तिरीयसंहिता ५।२।७) इत्यस्मिन्नुदाहरणे 'अक्षणयापदे' ककारषकारणकाराणां मध्ये संयोगो भवति। गार्ग्यगोपालयज्वना अङ्गसंहिताया एकमुदाहरणं प्रदीयते वैदिकाभरणे। तद्यथा – 'विभूरसि प्रवाहणः' इति। उदाहरणेऽस्मिन् 'व्यञ्जनं स्वराङ्गम्' (तैत्तिरीयप्रातिशाख्यम् २१।१) इति नियमाद् अङ्गिस्वरेण सह अङ्गभूतस्य व्यञ्जनस्य संयोगत्वाद् अङ्गसंहिता व्यवस्थाप्यते इत्यवधेया।

सन्धिविभागविषये तु प्रातिशाख्येषु मतविभिन्नता नास्ति। भाष्यकार उवटाचार्यः तदीये ऋक्प्रातिशाख्यस्य तथा वाजसनेयिप्रातिशाख्यस्य भाष्ये सन्धेश्चातुर्विध्यमुल्लिखितवान्। ते च यथा - स्वरसन्धिः, व्यञ्जनसन्धिः, स्वर-व्यञ्जनसन्धिः, व्यञ्जन-स्वरसन्धिश्च। तत्र संहितायां यदि पदान्त-पदाद्योः स्थितयोः स्वरयोः सन्निकर्षेण संश्लेषात् सन्धिर्भवति, तर्हि स स्वर-सन्धिरिति नाम्ना व्यपदिश्यते। यथा - अश्वऽअजनि। प्रऽचेतसः। (प.पा.) = 'अश्वाजनि प्रचेतसः' (ऋग्वेदसंहिता ६।७५।१३) इत्यत्र अ + अ = आ। पाणिनीये चर्चिता दीर्घ-यण्-अयादि-गुण-बृद्धि-पूर्वरूप-पररूप-प्रकृतिभावप्रभृतिरूपेण स्वरसन्धय ऋग्वेदप्रातिशाख्ये भिन्नशब्दैर्विवेचिताः। प्रातिशाख्येऽस्मिन् प्रश्लिष्टसन्धिः, क्षैप्रसन्धिः, भुग्नसन्धिः, अभिनिहितसन्धिः, पदवृत्तिसन्धिः, उद्ग्राहसन्धिः, उद्ग्राहपदवृत्तिसन्धिः, उद्ग्राहवत्सन्धिः, प्राच्यपञ्चाल-पदवृत्तिसन्धिः, प्रकृतिभावश्चेति भेदेभ्यः प्रणीतानां स्वर-सन्धीनां दशविधत्वं पर्यालोचितम्। एतेषां भेदानां सूक्ष्मेक्षिकया पर्यालोचनया परिलक्ष्यते यत्ते सर्वेऽपि स्वरसन्धयो वर्गत्रये समायान्ति। क्वचित् सवर्णदीर्घ-गुण-वृद्धि-पूर्वरूप-पररूप-परसवर्ण-प्रभृतय एकादेशो भवति। क्वचिद् यणादेशः, अयादेशश्चेत्येवमादेशः स्यात्। कुत्रचिदपि सन्धिर्न भवति, तत्र तावत् प्रकृतिभावो भवन्ति। अत्रेदमवधेयं यद् ऋक्प्रातिशाख्यवदपरेषु प्रातिशाख्येषु न लक्ष्यते सन्धीनाम् एतादृशानि नामानि। पुनः पदान्त-पदाद्योः व्यञ्जनयोः संहितायां विहितं विकारं व्यञ्जनसन्धिपदेन व्यपदेश्यम्। यथा – यत् । वाक् । वदन्ती । अविऽचेतनानि । (प.पा.) > 'यद्वाग्वदन्त्यविचेतनानि' (सं.पा) (ऋग्वेदसंहिता ८।१००।१०) इति। तदनुरूपं 'झलां जशोऽन्ते'(अष्टाध्यायी- ८।२।३९) इति पाणिनीयसूत्रात् पदान्त-पदाद्योः व्यञ्जनयोः विकारेण साम्यं लक्ष्यते 'चिद्रूपम्' इत्यादौ यथा। किञ्च, स्वरान्तव्यञ्जनाद्योः पदयोः सन्निकर्षात् स्वरव्यञ्जनसन्धेर्नियमः प्रवर्त्तते। यथा - 'न नि मिषति सुरणः' (ऋग्वेदसंहिता ३।२९।१४)

इति। अस्मिन् उदाहरणे 'न + नि', 'नि + मि', 'ति + सु' इति त्रिषु स्थलेषु स्वर-व्यञ्जनसन्धिर्भवति, य अनुलोम-अन्वक्षरसन्धिरिति नाम्ना व्यापदिष्टः प्रातिशाख्ये। अन्यथा व्यञ्जनान्तस्वराद्योः पदयोः सन्निकर्षाद् व्यञ्जनस्वरसन्धेर्नियमः प्रवर्त्तते। यथा – तम् । इन्द्रम् । दानम् । ईमहे । (प.पा.) > 'तमिन्द्रं दानमीमहे' (ऋग्वेदसंहिता ८।४६।६) इत्यत्र 'म् + इ', 'म् + ई' इति स्थलद्वये व्यञ्जनान्तस्वराद्योः पदयोः मेलनं साधितम्, न तु कोऽपि विकारो भवति।

## उपसंहृतिः

स्थूलदृष्ट्या सन्धिसंहितयोः उभयोः पदार्थोऽभिन्नः। उभयः सम्-पूर्वकं धा-धातोः निष्पन्नो भवति। शब्दशास्त्रे द्वयोः पदयोः अर्थरेव संयोगः। परन्तु प्रयोगदृष्ट्या उभययोर्मध्ये किञ्चिद् वैसादृश्यमस्ति। संहिताशब्देन संज्ञा तथा सन्धिशब्देन विधिश्चेति ज्ञेयम्। अतः संहितायां सत्यामेव सन्धेः कार्यत्वमुपपद्यते। प्रातिशाख्ये विहितानां सन्धिविधायकसूत्राणां समीक्षायामेतदायाति यत् सन्धिशब्दस्य व्यवहारः संहिताकार्याय क्रियते। पदपाठतः संहितापाठस्य निर्माणाय सन्धेर्नियमोऽपरिहार्यः। वस्तुतः संहितायामेव सन्धेर्नियमाः प्रक्रमन्ते। संहितायां सुसन्निकर्षात् पदान्त-पदाद्योः स्थितयोः वर्णयोः लोपः, आगमः, वर्णविकारः, प्रकृतिभावः इत्यादिभिः सन्धिकार्यो निष्पद्यते इति दिक्।

## संदर्भ सूची

1. Bhattacharya, Tapansankar. Vaidika-Vyakaraṇa. Kolkata, Sanskrit Book Depot, 2002.
2. Bhaṭṭoji-Dikṣita. Vaiyākaraṇa-Siddhānta-Kaumudī. (Part-I): Ed. with Bālmanoramā & Tattvabodhinī. Giridhara Sharma & Parameshwarananda.

[24] तैत्तिरीयप्रातिशाख्यम् (वैदिकाभरणभाष्यम्). सम्पा. आर् शामशास्त्रि- के.रङ्गाचार्यौ. पृष्ठाङ्कः – ५२४

Delhi/Mumbai/Chennai/Kolkata/Bengaluru/Varanasi/Pune/Patna, MLBD, 2004 (10th rpt.).
3. Chatterji, Kshitishchandra. Technical terms and technique of Sanskrit grammar. Kolkata, Sanskrit Pustak Bhandar, 2003(1st rpt.).
4. Macdonell, Arthur. A. A Vedic Grammar for Students. Delhi, MLBD, 2010(4th rpt.).
5. *Mahābhāṣyam*. Ed. with Snsk. Text (Paspaśāhṇikam) & Beng. Trans. Sanghmitra Sengupta, Kolkata, Sanskrit Pustak Bhandar, 1407 bangabda.
6. Mishra, Jagadish Chandra. *Vaidikavāṅmayasyetihāsa.* Varanasi, Chaukhamba Surbharati Prakashan, 2016.
7. Pāṇinīya-Śikṣā. Ed. Damodar Mahato. Varanasi, MLBD, 2015.
8. *Ṛgveda-Prātiśākhya.* Ed. with commentary of Paśupati Śāstri & Beng. Trans. Amar Kumar Chattopadhyay. Kolkata, Sanskrit Pustak Bhandar, 2008.
9. *Ṛgveda-Prātiśākhya.* Ed. with commentary of Uvaṭācārya & Hindi Trans. Virendra Kumar Varma. Delhi: Chaukhamba Sanskrit Pratishthan. 1970.
10. Taittirīya- *Prātiśākhya.* Ed. with commentary of Tribhāṣyaratna and Vaidikābharaṇa R. Shama sastri & K. Rangacharya. Delhi//Varanasi/ Patna/Madras, MLBD, 1985(1st rpt.).